# प्रथम सत्रान्त परीक्षा

**इयत्ता – १० वी** **विषय :- संस्कृत (संपूर्ण)** **गुण – ८०**

**प्रथम : विभाग : सुगमसंस्कृतम्। (८)**

**प्र.१) अ) चित्रं दृष्टवा नामानि लिखत। (५ त:४)** ०४

१) 

२) 


३) 

४) 

५) 

**आ) सङ्ख्या: अक्षरै: /अङ्कै: लिखत। (३ त: २)** ०२

१) ६५ ----------  २) नवाशीतिः------- ३) ७० ------------

**इ) समय-स्तम्भमेलनं कुरुत।** ०२

| **'अ'** | **'आ'** |
|---|---|
| १) पादोन-पञ्चवादनम् | ४.४५ |
| २) सपाद-त्रिवादनम् | ४.४० |
| ३) पञ्चोन-पञ्चवादनम् | ३.१५ |
| ४) चत्वारिंशत्-अधिक-चतुर्वादनम् | ४.५५ |

**द्वितीय: विभाग :- गद्यम्। (२०)**

**प्रश्न २) अ) गद्यांश पठित्वा निर्दिष्ट: कृती: कुरुत।**

अथ प्राप्तः सुदासस्तदुद्यानं, यत्र भगवत सुगतस्य निवासः । तत्र वटवृक्षस्याधस्तादेकस्मिन्नश्मखण्डे समुपविष्ट आसीत्स महात्मा| अनल्पेन धाम्ना राजते स्म तस्य भगवतो वदनम्| तदालोकयतः सुदासस्य चित्ते भक्तिरसार्णव उदतिष्ठत्| स हस्तस्थं नीरजं भगवतः सुगतस्य चरणयोरर्घ्यं कृत्वा 'नमो भगवते' इति वदन् सविनयं प्राणमत्|

तं प्रसादवर्षिभ्यां लोचनाभ्यां निरुपयन् स्मयमानमुखपद्मो भगवान् अभाषत्, "वत्स, किमिच्छसि?" इति| एव उक्तवति सुगते निरिच्छः सुदासः प्रत्यवदत्, "भवन् किमन्यत्? केवलं भगवतः चरणकमलस्पर्शेन आत्मा मे कृतार्थतां लभताम्" इति|

एवंवादिनं सुदासं 'तथास्तु' इत्यब्रवीद् भगवान् सुगतः | अहो प्रभावः सुगतस्य यत्तस्य दर्शनमात्रेणैव कमलार्थं बहुमूल्यमपेक्षमाणः सुदासस्तद्विस्मृत्य सुगतचरणाभ्यां तत्कमलं समर्पितवान्|

एष सुगतः एव ननु भगवान् गौतमबुध्दः |

**१) अवबोधनम्। (४ त: ३)** ०३

क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत|

सुदासः सुगतचरणाभ्यां तत्कमलं समर्पितवान् यतः -------------|

१) सुदासः सुगतस्य प्रभावेन प्रभवितः|

२) सुगतः सुदासाय अधिकं धनं यच्छति|

ख) पूर्णवाक्येन उत्तरं लिखत|

महात्मा कुत्र उपविष्टः आसीत्?

ग) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं वा इति लिखत|

सुगतः सुदासाय कमलार्थम् अधिकमूल्यं यच्छति|

घ) एषः गद्यांशः कस्मात् पाठात् उध्दृतः?

**२) शब्दज्ञानम्। (३ तः २)** **०२**

क) प्रश्ननिर्माण कुरुत|

भगवतो वदनं <u>धाम्ना</u> राजते स्म|

ख) उत्तरपदं लिखत|

१) चरणयोरर्घ्यम् = चरणयोः + ---------| २) इत्यब्रुवीत् = इति + -----------|

ग) लकारं लिखत|

१) आत्मा मे कृतार्थता <u>लभताम्</u>|

**३) पृथक्करणम्। क्रमेण योजयत।** **०२**

१) 'तथास्तु' इत्यब्रवीद भगवान् सुगत|

२) यत्र भगवतः सुगतस्य निवासः|

३) आत्मा मे कृतार्थतां लभताम्|

४) "वत्स, किमिच्छसि?"

**आ) गद्यांश पठित्वा निर्दिष्टाः कृतीः कुरुत।**

पिता – इतोऽपि लघुतरं भागं कर्तुं शक्यते वा?

अर्णव – यदि क्रियते तर्हि चूर्णं भवेत् तस्य|

पिता – सम्यग् उक्तं त्वया| यत्र एतद् विभाजनं समाप्यते, यस्मात् सूक्ष्मतरं भागं प्राप्तुं न शक्यते सः एव परमः अणुः|

अर्णवः – द्रवस्य अन्तिमः घटकः मूलं तत्वं च परमाणुः, सत्यं खलु?

पिता – सत्यम्| अयं खलु कणादमहर्षेः सिध्दान्तः| अपि जानासि? परमाणुः द्रवस्य मूलकारणम् इति तेन महर्षिणा प्रतिपादितम| तदपि प्रायः खिस्तपूर्व पञ्चमे षष्ठे वा शतके|

अर्णवः – तात, महर्षिणा कणादेन किं किम् उक्तं परमाणुविषये? वयं तु केवलं तस्य महाभागस्य नामधेयम् एव जानीमः|

पिता – कणादमुनिना प्रतिपादितम् – परमाणुः अतीन्द्रियः, सूक्ष्मः, निरवयवः, नित्यः, स्वयं व्यावर्तकः च|

**१) अवबोधनम्।** (४ तः ३) **०३**

क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत|

१) ------- द्रव्यस्य मूलकारणम्| (परमाणुः / विज्ञानं)

२) अणुभ्यः ------- परमाणवः | (सूक्ष्मतराः / स्थूलतराः)

ख) कः कं वदति?

अयं खलु कणादमहर्षेः सिध्दान्तः|

ग) पूर्णवाक्येन उत्तरं लिखत|

परमाणुसिध्दान्तः केन महर्षिणा कथितः?

घ) वाक्यं पुनर्लिखित्वा सत्यम्/ असत्यम् इति लिखत|

सम्यग् उक्तं त्वया|

**२) शब्दज्ञानम्।** (३ तः २) **०२**

क) गद्यांश २ तृतीया विभक्त्यन्त पदे चित्वा लिखत|

ख) गद्यांशात् विशेषण चित्वा लिखत|

१) ------------- भागम्   २) ------- घटकः |

ग) लकारं लिखत|

अपि <u>जानासि</u>?

**३) पृथक्करणम्।** **०२**

जालरेखाचित्रं पूरयत|




**इ) माध्यमभाषया सरलार्थं लिखत।** (२ तः १) **०४**

१) रदनिका – एहि वत्स| शकटिकया क्रीडावः |

दारकः – (सकरुणम्) रदनिके! किं मम एतया मृत्तिकाशकटिकया, तामेव सौवर्णशकटिकां देहि|

रदनिका – (सनिर्वेदं निःस्वस्य) जात! कुतोऽस्माकं सुवर्णव्यवहारः? तातस्य पुनरपि ऋध्दया सुवर्णशकटिकया क्रीडिष्यसि| (स्वगतम्) तद्यावद्विनोदयाम्येनम्| आर्यावसन्तसेनायाः समीपमुपसर्पिष्यामि| (उपसृत्य) आर्ये! प्रणमामि|

२) शक्रः – (कर्णमुपगम्य) भोः कर्ण, महत्तरां भिक्षां याचे|

कर्ण : – दृढं प्रीतोऽस्मि भगवन्| एषोऽहं नमस्करोमि|

शक्रः – (आत्मगतम्) किं नु खल्वहं वदामि? यदि दीर्घायुभेवेति वदेयम् दीर्घायुर्भवेत्| यदि न वदेयम् मूढ इति मां परिभवति| तस्माद उभयं परिहत्य किं नु खलु भाषे? भवतु दृष्टम्|

**ई) माध्यमभाषया उत्तरं लिखत। (२ त: १)** ०२

१) काकेन कः उपायः उक्तः?

२) धरित्र्याः उपदेशं मनसि निधाय पृथुवैन्यः किं किम् अकरोत्?

## तृतीय: विभाग: – पद्यम्। (१८)

**प्रश्न ३) अ) पद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत।**

उत्तमो नातिवक्ता स्यादधमो बहु भाषते|
सुवर्णे न ध्वनिस्तादृग्यादृक्कांस्ये प्रजायते||

यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः|
यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं
तदा मुर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः||

घटं भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभरोहणम्|
येन केन प्रकारेण प्रसिध्दः पुरुषो भवेत्||

**१) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। (३ त: २)** ०२

क) पूर्णवाक्येन उत्तरं लिखत|

कः बहु भाषते?

ख) विशेषण – विशेष्य – मेलनं कुरुत|

| अ.क्र. | अ | आ |
|---|---|---|
| १. | अवलिप्तम् | कनकम् |
| २. | मदान्धः | मनः |
| | | द्विपः |

ग) पूर्वपदं लिखत|

१. स्यादधमः = ------------ + अधमः

२. अभवदवलिप्तम् = -------------- + अवलिप्तम्

**२) जालरेखाचित्रं पूरयत।** ०२




**आ) माध्यमभाषया उत्तरं लिखत। (२ त: १)** ०२

१) 'क्रियासिध्दिः सत्वे भवति' इति सूर्यस्य उदाहरणेन स्पष्टीकुरुत|

२) 'विद्या नाम नरस्य' ----- इति श्लोकाधारेण विद्यायाः महत्वं लिखत|

इ) पदये शुध्दे पूर्णे च लिखत|

(क, ख तः १, ग, घ, तः १)

क) विद्या नाम ------ पशुः ||

अथवा

ख) प्रथमवयसि ----------- विस्मरन्ति||

ग) यथा चतुर्भिः --------- कर्मणा||

अथवा

घ) यादृशं ---------- फलम्||

**ई) अन्वयं पूरयत।** **०२**

------ आत्मनः मुखदोषेण ------- | तत्र ------ न बध्यन्तें| (यतः) ----- सर्वार्थसाधनम्|

**उ) माध्यमभाषया सरलार्थं लिखत। (३ तः २)** **०४**

१) मनुजा वाचनेनैव बोधन्ते विषयान् बहून्|
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुता||

२) अद्ययावध्दि ज्ञानाय वृत्तपत्रं पठेत्सदा|
सर्वविधसुविद्यार्थं वाचनमुपकारकम्||

३) वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम्|
वार्धक्ये दुःखहरण हितं सदग्रन्थवाचनम्||

**चतुर्थः विभागः- लेखनकौशलम्। (९)**

**प्रश्न ४) अ) धातूनाम् अव्ययानां च उपयोगं कृत्वा वाक्यनिर्माण कुरुत। (६ तः ४)** **०४**

१) उभयतः २) बहिः ३) रुच् (१ आ.प.)

४) कृते ५) रक्ष् (१ प.प) ६) स्निह (४ प.प.)

**अथवा**

**संस्कृतानुवादं कुरुत। (६ तः ४)** **०४**

१) पुस्तकाचा रंग निळा आहे.

२) मी पायांनी चालते व धावते.

३) माकड झाडावर राहते.

४) विद्यार्थी प्रश्न विचारतात.

५) राम नावाचा राजा होता.

६) पशु घनदाट अरण्यात राहतात.

**आ) ५/७ वाक्यात्मकं निबन्धं संस्कृतेन लिखत। (३ तः १)** **०५**

१) मम प्रिया भाषा २) मम प्रिय : नेता ३) मम प्रियः कविः

**अथवा**

**साहाय्यक – शब्दानाम् आधारेण ५/७ वाक्यात्मकं चित्रवर्णन कुरुत।** **०५**




(मत्र्जूषा – ददाति, गृह्णाति, नयाति, विक्रीणीते, स्वीकरोति, वहति, पचति)

**पत्र्चमः विभागः- भाषाभ्यासः १ (१७)**

**प्रश्न ५) अ) तालिकापूर्तिं कुरुत।**

**१) नाम – तालिकां पूरयत।** (६ तः ४) **०२**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| भगवतः | ---- | ---- | षष्ठी |
| ----- | आत्मानौ | ---- | द्वितीया |
| ----- | ----- | राजसु | सप्तमी |

**२) सर्वनाम – तालिकां पूरयत।** (६ तः ४) **०२**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| ----- | ------ | ताभिः | तृतीय| |
| ----- | आवाभ्याम् – नौ | ------ | चतुर्थी |
| भवतः | ----- | ----- | पत्र्चमी |

**३) क्रियापद – तालिकां पूरयत।** (६ तः ४) **०२**

| लकारः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|---|
| लोट् | यच्छतु | ----- | ---- | प्रथमः पुरुषः |
| लट् | ------ | भाषेथे | ---- | मध्यमः पुरुषः |
| लङ् | ----- | ----- | अस्मामहि | उत्तमः पुरुषः |

**४) धातुसाधित – विशेषण – तालिकां पूरयत।** (६ तः ४) **०२**

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच |
|---|---|---|---|---|
| गम् (१ प.प.) | गतः | ---- | ---- | गच्छन् |
| लभ् (१ आ.प.) | ---- | लब्धवान् | लब्धव्यः | ---- |
| कृ (८ उ.प.) | --- | ---- | कार्यः | कुर्वाणः |

**आ) निर्दिष्टाः कृतीः कुरुत। (४ तः३)**

**१) योग्यं रुपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत। (५ तः३)** ०३

क) -------- (४) वेदाः वर्तन्ते| (सङ्ख्यावाचकम्)

ख) सप्ताहस्य ------- (३) संस्कृतवर्गः भवति| (आवृतिवाचकम्)

ग) भवने मम गृहं ------- (७) तले वर्तते| (क्रमवाचकम्)

घ) छात्रः दिनस्य ------ (२) अध्ययनं करोति| (आवृतिवाचकम्)

च) पौषमासः संवत्सरस्य ------ (१०) मासः | (क्रमवाचकम्)

**२) समासाना तालिकापूर्तिं कुरुत। (५ तः ३)** ०३

| | **समस्तपदम्** | **विग्रहः** | **समासनाम** |
|---|---|---|---|
| १. | चिन्ताकुलः | चिन्तया आकुलः | -------- |
| २. | -------- | पुस्तकस्य पठनम् | षष्ठी – तत्पुरुषः |
| ३. | शुकसारिकाः | ------- | इतरेतर द्वन्द्वः |
| ४. | अरुचिः | ------ | नञ् – तत्पुरुषः |
| ५. | भारतदेशः | भारतः नाम देशः | -------- |

**३) समानार्थक शब्दान् / विरुध्दार्थकशब्दान् लिखत। (५ तः ३)** ०३

क) पादपः = ---------| ख) सुकृतम् x -------- |

ग) तडागः = --------- | घ) साधवः x ---------|

च) पटम्= ----------|

**४) सूचनानुसारं कृतीः कुरुत। (५ तः ३)** ०३

क) सुदासः सुगतचरणाभ्यां कमलं समर्पितवान्| (वाच्यपरिवर्तनं कुरुत|)

ख) मृगः प्रत्यहं तत्र गत्वा सस्यम् अखादत्| (त्वान्त – अव्ययं निष्कासयत|)

ग) त्वं धनुः त्यज| ('त्वं' स्थाने 'भवान्' योजयत|)

घ) वयम् आनन्देन एकत्र निवसामः | (लट्लकारस्थ स्थाने लङ्लकारं योजयत|)

च) यानं चलति| (चालकः) (णिजन्तं कुरुत|)

**षष्ठः विभागः- अपठितम्।** (८)

**प्रश्न ६) अ) गद्यांश पठित्वा कृतीः कुरुत।** (६ तः ४) ०४

सुनीता अनीता च माधवदासस्य द्वे कन्ये| सुनीतायाः पतिः मालाकारः तथा अनीतायाः पतिः कुम्भकारः | एकदा सुनीता पितरम् अवदत्, "तात प्रभूतं पर्जन्यः वर्षतु इति मे इच्छा| येन अस्माकं वनस्पतयः पर्याप्तं जलं प्राप्स्यति| तच्छुत्वा समीपे उपविष्टा अनीता सत्वरम् अवदत्, "न न| तात| अहं तु चण्डातपं कामये| येन अस्माकं मृद्घटाः सुरक्षिताः स्युः| उभयोः कामनाम् आकर्ण्य माधवदासः मनसि अवदत् "किमहं वदाम्यत्र?

१) पूर्णवाक्येन उत्तरत|

कस्याः पतिः मालाकारः?

२) प्रातिपदिकं लिखत|

क) कामनाम्  ख) अस्माकम्

३) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत|

एकदा सुनीता मातरम् अवदत्|

४) माध्यमभाषया सरलार्थ लिखत|

"प्रभूतं पर्जन्यः वर्षतु इति मे इच्छा|"

५) गद्यांशात् एकम् अव्ययं चित्वा लिखत|

६) कारकपरिचयं कुरुत|

<u>अहं</u> तु चण्डातपं कामये|

**आ) १) पद्यांश पठित्वा निर्दिष्टे कृती कुरुत।** ०२

नमामि शारदां देवीं विद्यारम्भे सुमङ्गलम्|

नरस्तस्याः प्रसादेन पाण्डित्यं लभते सदा|

क) पूर्णवाक्येन उत्तरत| (२ तः १)

१) नरः शारदायाः प्रसादेन किं लभते?  २) कवि कां नमति?

ख) समानार्थकं शब्दं लिखत|  शारदा = ----------|

**आ) २) पद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** ०२

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा|

ऊहापोहः अर्थविज्ञानं तत्वज्ञानं च धीगुणाः ||

